श्रीगणेशायनमः॥अथशिवकवचप्रयोगप्रारंभः॥कार्त्तिकेमार्गशीर्षेवामाघेवैशाख सं
ज्ञिते॥श्रावणेवकृष्णेपक्षेजपस्यारंभणंकुरु॥ एकादशाह्नतंकुर्यादेकादशसहस्र
तः॥एकादशंलुलक्षंचजपंकुर्यात्प्रयत्नतः॥उत्तमंमध्यमंश्लोकंकनिष्ठंचविशो
धनः॥अथप्रयोगः॥अद्यपूर्वोच्चरित्तः॥ देशकालौसंकीर्त्य॥ ममदृढजन्मनि॥
जन्मांतरेषानिखिलदुरितदोर्भाग्यदुःस्वप्नदुर्निमित्तग्रहभूतप्रेतपिशाचब्र
ह्मराक्षसादिबाधाशांत्यर्थंपुत्रपौत्रादिधनधान्यछिन्नसंतत्तिस्थिरलक्ष्मीप्राप्त्यर्थं
ममचानुपराजयसदाभीष्टसंसिध्यर्थं॥श्रीसांबसदाशिवप्रीत्यर्थं॥अमुकसं
ख्यायाशिवकवचसहस्रावर्णोक्तमंत्रजपशिवपंचाक्षरेणसंपुटितं॥अमु
ककामनयास्वयंब्राह्मणद्वारावाश्रीसांबसदाशिवप्रीत्यर्थेअमुकसंख्याकपुर
श्चरणंकरिष्ये॥ इतिसंकल्प्य॥आदौनिर्विघ्नतासिध्यर्थंगणपतिपूजनपूर्वं

शिवकवच ॥१॥

कं स्वस्तिपुण्याहवाचनं मात्रकापूजनं नांदीश्राद्धं आचार्यादिऋत्विक्वर्णंकरिष्ये॥ प्रयोग॰
उक्तरीत्याकुर्यात्॥आचार्यादीन्वृत्वात्रार्थयेत्॥ ततः आचार्यःयजमानेनसहजपस्थानं शिवालयेगत्वा॥आचम्य॥प्राणानायम्य॥दर्भान्धारयमाणः॥देशकालौसंकीर्त्य॥ पूर्वसंकल्पितजपसंख्यापरिपूर्णार्थंयथाशक्तिदिनं॥अष्टोत्तरशतादष्टशतसंख्यया शिवकवचमंत्रजपमहंकरिष्ये॥गणपतिंनत्वा॥ओंमोक्षप्रकारेणासनविधिः॥ ५
भूशुद्धिंभूतशुद्धिंप्राणप्रतिष्ठांअंतर्मातृकाबहिर्मातृकापवनपावनांतरात्मशुद्धिं कृत्वा ततःओं॥ॐ स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंबृहस्पतिंदधातुसंदेवतानां॥ऊर्ध्वंघर्मिंद्रसवंसमुत्कंहृद्यद्योनावधिवारुहेम॥ऊर्ध्वोमुचंमांगिरःसंगर्यंचस्वस्त्यात्रेयं मनसाचुतार्क्ष्यं॥नमस्तेपाणिःशरणंप्रपद्येस्वस्तिसंधाधेषभयन्नोअस्तु॥ ॥ ११॥

॥तत्करोक्तेनन्यासंकुर्यात्॥तद्यथा॥ तत्रोमूलेन॥

शिवकवचं पठेत्

आचम्य॥मूलेन॥प्राणायामत्रयंकुर्यात्॥न्यासमारभेत्॥ अस्यश्रीशिवकवचमंत्रस्य॥ब्रह्मऋषिः॥श्रीसांबसदाशिवोदेवता॥अनुष्टुपूछंदः॥महेश्वरायेतिबीजं॥गौरीनिवासेतिशक्तिः॥शिवायेतिकीलकं॥श्रीसांबसदाशिवप्रीत्यर्थेन्यासेविनियोगः॥अथन्यासः॥ॐ ब्रह्मऋषयेनमः शिरसि॥अनुष्टुपूछंदसेनमःमुखे॥ॐ श्रीसांबसदाशिवदेवतायैनमःहृदये॥ॐ महेश्वरायेतिबीजायनमःगुह्ये॥ॐ गौरीवल्लभेतिशक्तयेनमःपादयोः॥ॐ श्रीकंठायेतिकीलकायनमःसर्वांगे॥ॐ ज्ञानात्मनेनमः॥अंगुष्ठाभ्यांनमः॥ॐ गुरवेनमःतर्जनीभ्यांस्वाहा॥ॐ अगोचरायनमःमध्यमाभ्यांवषट्॥ॐ अमृतेश्वरायनमः॥अनामिकाभ्यांहुं॥ॐ ईश्वरायनमःकनिष्ठिकाभ्यांवषट्॥ॐ स्थिरबुद्धिनेनमः॥करतलकरपृष्ठाभ्यांफट्॥एवंहृदयादिन्यासः॥ॐ ज्ञानात्मनेनमः॥हृदयायनमः॥ॐ गुरवेनमः॥शिरसेस्वाहा॥ॐ अगोचरायनमः॥शिखायैवषट्॥ॐ अमृतेश्वरायनमः॥कवचा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

यहुं॥ॐ ईश्वरायनमः॥नेत्रत्रयायवौषट्॥ॐ स्थिरधन्विनेनमः॥अस्त्रायफट्॥अथदिग्न्या
सः॥ॐ दुंदुर्गायैनमः॥प्राच्यैदिशंबध्नामि॥ॐ विंविनायकायनमः॥दक्षिणदिशंबध्नामि॥
ॐ नंनंदिकेश्वरायनमः॥प्रतीच्यैदिशंबध्नामि॥ॐ क्षंक्षेत्रपालायनमः॥उदीचीदिशंबध्ना
मि॥ॐ धंधर्मराजायनमः॥सर्वादिशंबध्नामि॥अथमंत्रतंत्रग्रंथेऽयंविशेषः॥ॐ ब्रह्म
णेनमः॥पादयोः॥ॐ विष्णवेनमः॥हृदि॥ॐ महेश्वरायनमः शिरसि॥ॐ सप्तऋषिभ्योन
मः॥ शिखायां॥ॐ अश्विभ्यांनमः॥श्रोत्रयोः॥ॐ वह्निभास्कराभ्यांनमः॥चक्षुषि॥ॐ स
रस्वत्यैनमः॥जिह्वायां॥ ॐअग्नयेनमः॥वाचि॥ॐ मरुद्भ्योनमः॥दंतपंक्तौ॥ॐ हव्यवाह
नायनमः॥जठरे॥ॐ गंधर्वाप्सरोभ्योनमः॥पादयोः॥ॐ महामेरुरथेभ्योनमः॥हृत्कमल
जकर्णिकायां॥ॐ अष्टवसुभ्योनमः॥वामहस्ते॥ॐ एकादशरुद्रेभ्योनमः॥दक्षिणहस्ते
ॐ द्वादशादित्येभ्योनमः॥नाभ्यां॥ॐ अश्वेभ्यो भैरवेभ्योनमः॥सर्वांगे॥ अथशिवपंचा

क्षरंन्यासः॥ॐ वामदेवायनमः॥शिरसि॥ॐ ऋषयेनमः मुखे॥ॐ पंक्तिछंदसेनमः॥
हृदये॥श्रीसांबसदाशिवदेवतायैनमः॥गुह्ये॥ॐ बीजायनमः॥पादयोः॥ ॐ उमाव
ल्लभेनमः सर्वांगे॥ॐ अँअंगुष्ठाभ्यांनमः॥ॐ नंतर्जनीभ्यांस्वाहा॥ॐ मंमध्यमाभ्यांवषट्॥
ॐ शिंअनामिकाभ्यांहुं॥ॐ वांकनिष्ठिकाभ्यांवषट्॥ॐ यंकरतलकरपृष्ठाभ्यांफट्॥एवंहृ
दयादिन्यासः॥ॐ हृदयायनमः॥ॐ नंशिरसेस्वाहा॥ॐ मंशिखायैवषट्॥ॐ शिंक
वचायहुं॥ॐ वांनेत्रत्रयायवौषट्॥ॐ यंअस्त्रायफट्॥ॐ नमः शिवायेतिमंत्रेणम
स्तकादिपादांतंसर्वांगे एकादशावारंन्यसेत्॥ अथकवचोक्तंद्वादशांगंन्यासः॥
ॐ सद्योजाताय नमः॥दक्षिणपादे॥ॐ पशुपतयेनमः॥दक्षिणजानुनि॥ॐ शा
र्वायनमः॥वामजानुनि॥ॐ विरूपायनमः॥दक्षिणकट्यां॥ॐ त्र्यंबकायनमः॥द
क्षिणहस्ते॥ॐ कपर्दिनेनमः॥ वामहस्ते॥ॐ भैरवायनमः॥दक्षिणांसे॥ॐ भू

रुपाषयेनमश्चमांसेभ्यः॥ॐ ईशानायनमः॥मूर्द्धि॥ॐ महेश्वरायनमः॥सर्वांगे॥ॐपंच
वक्त्रायनमः॥ इतितर्ज्जन्यंगुष्ठयोगेनदिग्बंधनंकृत्वाऽस्यश्रीशिवकवचस्तोत्रमंत्र
स्य॥ ऋषभयोगीऋषयेनमः शिरसि॥अनुष्टुबादिनानाछंद सेनमुखे॥श्रीसां
बसदाशिवरुद्रदेवतायेनमःहृदये॥ॐबीजायनमः नाभौ॥ॐशक्तयेनमगु
ह्ये॥ शिवकीलकायनमः पादयोः॥श्रीसांबसदाशिवप्रीत्यर्थेजपेविनियोगःऽअथ
न्यासः॥ॐनमोभगवतेॐमहारुद्रायज्वलज्वलज्वालामालिनेॐह्रींश्रींक्रींअंगुष्ठा
भ्यांनमः॥ॐनमोभगवतेनंमहारुद्रायज्वलज्वलज्वालामालिनेॐह्रींश्रींक्रींतर्ज्जनी
भ्यांस्वाहा॥ॐनमोभगवतेमंमहारुद्रायज्वलज्वलज्वालामालिनेॐह्रींश्रींक्रींमध्य
माभ्यांवषट्॥ॐनमोभगवतेशिंमहारुद्रायज्वलज्वलंमालिनेॐह्रींश्रींक्रींअनामि
काभ्यांहुं॥ॐनमोभगवतेवांमहारुद्रायज्वलज्वलज्वालामालिनेॐह्रींश्रींक्रींकनि

ष्ठिकाभ्यांवषट्॥ॐनमोभगवतेयंमहारुद्रायज्वलज्वलज्वालामालिनेॐह्रींश्रींक्रींकर
तलकरपृष्ठाभ्यांफट्॥एवंहृदयादिन्यासः॥ॐनमोभगवतेॐमहारुद्रायज्वलज्वल
ज्वालामालिनेॐह्रींश्रींक्रींहृदयायनमः॥ॐनमोभगवतेनंमहारुद्रायज्वलज्वलज्वाला
मालिनेॐ ह्रींश्रींक्रींशिरसेस्वाहा॥ॐनमोभगवतेमंमहारुद्रायज्वलज्वलज्वालामा
लिनेॐह्रींश्रींक्रींशिखायैवषट्॥ॐनमोभगवतेशिंमहारुद्रायज्वलज्वलज्वालामालि
नेॐह्रींश्रींक्रींकवचायहुं॥ॐनमोभगवतेवांमहारुद्रायज्वलज्वलज्वालामालिनेॐह्रींश्रीं
क्रींनेत्रत्रयायवौषट्॥ॐनमोभगवतेयंमहारुद्रायज्वलज्वलज्वालामालिनेॐह्रींश्रींक्रीं
अस्त्रायफट्॥अथध्यानं॥हस्ताभ्यांकलशद्वयामृतरसैराप्लावयंतंशिरोद्वाभ्यांतोदधवं
मृगाक्षवलयेद्वाभ्यांवहंतंपरं॥अंकन्यस्तकरद्वयामृतघटंकैलासकांतंशिवंस्व
स्त्यांभोजगतंनवेंदुमुकुटंदेवंत्रिनेत्रंभजे॥१॥श्रीसांबसदाशिवारूढंहिरण्यबाहुंहि

रण्यरूपं॥ पशुपाशविमोचकंपुरुषंकृष्णपिंगलं॥ ३॥ ऊर्ध्वरेतंविरूपाक्षंविश्वत्तः सह स्राक्षं॥ सहस्रशीर्षंसहस्रचरणंविश्वतोमुखं॥ ३॥ विश्वात्मानंनमाम्यहंनिष्कलंकं निर्गुणं॥ शांतंशिवमक्षरमव्ययंहरिंहिरण्यं॥ ४॥ गर्भादिसहस्राक्षरमप्रमेयमनाद्यंतं॥ शिवमृगटंकाभयवरंशुक्लव्याघ्राजिनं बरंजुडंत्रिनेत्रंपंचवक्त्रंशिवं भजेत्॥ ५॥ इतिध्यानं समाप्तं ॥अहंशिवःशिवः सोहमितिचेतसिचिंतयेत्॥ पंचोपचारैःपूजयेत्॥ ऊंहृत्थिच्यात्मकंकनिष्ठिक्यांगुष्ठयोः॥ शिवकवचसहस्राक्षरदेवता भ्योनमः॥ गंधंसमर्पयामिनमः॥ हूंआकाशात्मकंतर्जन्यांगुष्ठयोः॥ शिवकवचसह स्राक्षरदेवताभ्योनमः॥ पुष्पंसमर्पयामिनमः॥ यंवायुवात्मकंमध्यमांगुष्ठयोः॥ शि वकवचसहस्राक्षरदेवताभ्योनमः॥ धूपंसमर्पयामिनमः॥ रंअग्न्यात्मकंअनामिकांगु ष्ठयोः॥ शिवकवचसहस्राक्षरदेवताभ्योनमः॥ दीपंसमर्पयामिनमः॥ वंअमृतात्म

प्रयोग॰ ॥५॥

व

कंसर्वांगुष्ठयोः॥ शिवकवचसहस्राक्षरदेवताभ्योनमः॥ अमृतंनैवेद्यंसमर्पयामिनमः॥ तांप रमात्मनेनमः॥ शिवकवचसहस्राक्षरदेवताभ्योनमः॥ त्रयोदशगुणिततांबूलंसमर्पया मिनमः॥ संसोमात्मकं शिवकवचसहस्राक्षरदेवताभ्योनमः॥ सर्वेराजोपचारान्यरिक ल्पयामिनमः॥ अहमस्मिशिवोहमस्मीतिभावयेत्॥ अथजपप्रारंभः॥ वज्रदंष्ट्रंत्रिनय नंकालकंठमरिंदमं॥ सहस्रकरमत्युग्रंवंदेवंसदाशिवं॥ १॥ अतःपरंसर्वपुराणगुह्यं निः शेषपापौघहरंपवित्रं॥ जयप्रदं सर्वविपत्प्रमोचनंवक्ष्यामितेवंकवचंहितायते॥ २॥ ऋषभउवाच॥ नमस्कृत्वामहादेवंसर्वेष्वापिनमीश्वरं॥ वक्ष्येशिवमयंवर्मसर्वरक्षा करंनृणां॥ ३॥ शुचौदेशेसमासीनोयथावत्कल्पितासनः॥ जितेंद्रियोजितप्राणश्चि तयेच्छिवमव्ययं॥ ४॥ हृत्पुंडरीकांतरसंनिविष्टं स्वतेजसाव्याप्तनभोवकाशं॥ अतींद्रियंसूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयंमहेशं॥ ५॥ ध्यानावधूताखिलकर्मबंध

श्रिरंविदानंद निमग्नचेत्ताःषडक्षरंन्याससमाहितात्मात्रीचेनकुर्यात्कवचेनरक्षां॥७॥ प्रयोग०
मांपातुदेवोखिलदेवतात्मासंसारकूपेपतितंगभीरे॥ तंनामदिव्यंवरमंत्रमूलंधुनो
तुमेसर्वमघंहृदिस्थं॥७॥ सर्वत्रमांरक्षतुविश्वमूर्त्तिर्ज्योतिर्मयानंदघनश्चिदा
त्मा॥अणोरणीयानुरुशक्तिरेकःसईश्वरःपातुभयादशेषात्॥८॥ योभूस्वरूपे
णबिभर्त्तिविश्वंपायात्समूमेर्गिरिशोष्टमूर्त्तिः॥ योपांस्वरूपेणनृणांकरोतिसं
जीवनंसोवतुमांजलेभ्यः॥ ९॥ कल्पावसानेभुवनानिदग्ध्वासर्वाणियोनृत्य
तिभूरिलीलःसकालरुद्रोवतुमांदवाग्नेर्वात्यादिभीतेरखिलाच्चतापात्॥१०॥
प्रदीप्तविद्युत्कनकावभासोविद्यावराभीतिकुठारपाणिः॥चतुर्मुखस्तत्पुरुषस्त्रि
नेत्रःप्राच्यांस्थितोरक्षतुमामजस्रं॥ ११॥ कुठारवेदांकुशपाशघण्टालकपालढक्का ॥५॥
क्षगुणांदधानः॥चतुर्मुखोनीलरुचिःस्त्रिनेत्रःपायादघोरोदितिदक्षिणस्यां॥

॥१२॥कुंदेंदुशंखस्फटिकावभासोवेदाक्षमालावरदाभयांकः॥ व्यक्षश्चतुर्वक्त्रउरुप्रभा
वःसद्योधिजातोवतुमांप्रतीच्यां॥१३॥वराक्षमालाभयटंकहस्तःसरोजकिंजल्कस
मानवर्णः॥ त्रिलोचनश्चारुचतुर्मुखोमांपायादुदीच्यांदितिवामदेवः॥१४॥वेदाभ
येष्टांकुशपाशटंकःकपालढक्काक्षत्रिशूलपाणिः॥सितद्युतिःपंचमुखोवतात्मा
मीशानमूर्ध्वंपरमप्रकाशः॥१५॥ मूर्धानमव्यान्ममचंद्रमौलिर्भालंममाव्यादथ
भालनेत्रः॥नेत्रेममाव्याद्भ्रुवनेत्रहारीनासांसदारक्षतुविश्वनाथः॥१६॥ पायाच्छु
तीमेश्रुतगीतकीर्त्तिःकपोलमव्यात्सततंकपाली॥वक्त्रंसदारक्षतुपंचवक्त्रोजि
ह्वांसदारक्षतुवेदजिह्वः॥१७॥ कंठंगिरीशोवतुनीलकंठःपाणिद्वयंपातुपिनाकपा
णिः॥दोर्मूलमव्यान्ममधर्मवाहुर्वक्षस्थलंदक्षमखांतकोव्यात्॥१८॥ ममोदरंपा
तुगिरींद्रधन्वामध्यंममाव्यान्मदनांतकारी॥हेरंबतातोममपातुनाभिंपायात्कटिं

धूर्जटिरीश्वरोमे॥१९॥ ईरुद्वयंपातुकुवेरमित्रोजानुद्वयंमेजगदीश्वरोव्यात्॥ जंघा
युगंपुंगवकेतुरव्यात्सदोममाव्यात्सुरवंद्यपादः॥ २०॥महेश्वरः पातुदिनादियामे
मांमध्ययामेवसुनामदेवः॥ त्रिपंचकः पातुतृतीययामेहृषध्वजः पातुदिनांत्ययामे
॥२१॥पायान्निशादौशशिशेखरोमांगंगाधरोरक्षतुमांनिशीथे॥ गौरीपतिः पातुनि
शावसानेमृत्युंजयोरक्षतुसर्वकालं॥२२॥ जंतःस्थितंरक्षतुशंकरोमांस्थाणुः स
दापातुबहिःस्थितंमां॥तदंतरेपातुपतिःपशूनांसदाशिवोरक्षतुमांसमंतात्॥२३॥
तिष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतंप्रमथाधिनाथः॥वेदांतवेद्योवतुमांनिषण्णं मा
मव्ययः पातुशिवःशयानं॥२४॥ मार्गेषुमांरक्षतुनीलकंठः शैलादिदुर्गेषुपुरत्रयारिः
अरण्यवासादिमहाप्रवासेपायान्मृगव्याधउदारशक्तिः॥२५॥ कल्पांतकायोपमदुष्ट
कोपः स्फुरद्दृहासोज्ज्वलितांडकोशः॥घोरारिसेनार्णवदुर्निवारान्महाभयाद्रक्षतुवीर

भद्रः॥२७॥पत्त्यश्वमातंगरथावरूथसहस्रलक्षायुतकोटिभीषणं॥ अक्षौहिणीनांशत
मातताय्यिनांछिंद्यान्मृडोघोरकुठारधारया॥ २८॥ निहंतिनोभूत्र लयानलार्चिर्ज्वलनि
शूलंत्रिपुरांतकस्य॥व्याघ्रर्क्षसिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुः पिनाकः॥२९॥
दुःस्वप्नदुःशाकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥ उत्पाततापवि
षभीतिमसद्ग्रहार्तिव्याधींश्चनाशयतुमेजगतामधीशः॥ ३०॥ इत्यंतंसकृत्सदित्वा
शिवपंचाक्षरमंत्रंजपेत्॥ ओंनमुं शंभवेदर्शी॥ ततः सद्यःस्वर्णोक्तमंत्रंजपेत्
ओंनमोभगवतेसदाशिवायसकलतत्त्वात्मकायसर्वमंत्र स्वरूपायसर्वयंत्राधिष्ठितायस
र्वतंत्र स्वरूपायसर्वतत्त्वविदूरायब्रह्मरुद्रावतारिणेनीलकंठायपार्वतीमनोहरप्रियाय
सोमसूर्याग्निलोचनायभस्मोद्धूलितविग्रहायमहामणिमुकुटधारणायमाणिक्यभूष
णायसृष्टिस्थितिप्रलयकालरौद्रावतारायरक्षोरजंसकायमहाकालभेदनायमूला

धीरैकनिलयायँ तत्वातीतायगंगाधरायँ सर्वदेवाधिदेवायषडाश्रयाय वेदांतसाराय
त्रिवर्गसाधनाया नेककोटिब्रह्मांडजनकाया नंतवासुकितक्षकर्कोटकशंखकु
लिकपद्ममहापद्मेत्यष्टमहानागकुलभूषणायप्रणवस्वरूपायँ चिदाकाश्यायाक
शादिकरूपायग्रहनक्षत्रमालिनेसकलायकलंकरहितायसकललोकेककर्त्रे
सकललोकेकसंहर्त्रेसकललोकेकगुरवेसकललोकेकसाक्षि
णेसकलनिगमगुह्यायसकलवेदांतपारगायसकललोकेकवरप्रदायसकललो
केशंकरायशाश्वतनिजावासायनिराभासाय निरा
मायनिर्मलायनिर्लोभाय निर्मदायनिश्चिंतायनिरहंकारायनिराकुलाय
निष्कलंकायनिष्कामायनिरुपप्लवायनिरवद्यायनिरंतरायनिष्कारणायनिरातंका
यनिष्प्रपंचायनिस्संगा यनिर्द्वंद्वायनिराधारायनिरामयायनिष्क्रोधायनिर्ममायँ नि

निर्गुणाय

ष्पापायनिर्भयायनिर्विकल्पायनिर्भेदायनिष्क्रियायनिस्तुलायनिःसंशयायनिरंजनायनि
रूपमविभवायनित्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाद्वयायपरमशांतस्वरूपायँ
तेजोमयायँ जयजयरुद्रमहारौद्रभद्रावतारमहाभैरवँ कालभैरवकल्पांतभैरवँ
वज्रकपालमालाधरखड्गँ खट्वांगचर्मपाशांकुशडमरुँशूलचापबाणगदाशक्तिभिंडि
मालान्वितमरुँ सलसुदूरपाशा परिघपरशुभुशुंडीशतघ्नीचक्रायुधभीषणकँ
रसहस्रमुखदंष्ट्राकरालँ विकटाट्टहासविस्फारिब्रह्मांडमंडलनागेंद्रकुंडलना
गेंद्रहारनागेंद्रवलयनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरांतकविश्वरूपविरूपाँक्षविश्वे
श्वरवृषभवाहँन विश्वतोमुखसर्वतोरक्षरक्षमांजँ्वलज्वलमहामृत्युभयंनो
शयनाशय रोगभयमुत्सादयोत्सादयविषसर्पभयंशमयशमयँ चोरान्मारयमा
रयममशत्रूच्चाटयोच्चाटयत्रिशूलेनविदारयविदारयकुठारेणभिंधिभिंधिखंड्गेन

चोर

नछिंधिछिंधिखड्गेननिशोथयविशोथयसुंसलेननिषेषयनिषेषयवाणैः संताडयसंतारय क्षांक्षिभीषयभीषयभूतान्निविद्रावयविद्रावयकूष्मांडवेतालमारी ब्रह्मराक्षसान्संत्रासयसंत्रासयमम शत्रूंकुरुवित्रस्तान्मामाश्वासयाश्वासयनरकभयान्मामुद्धरोद्धरसंजीवयसंजीवयक्षुत्तृड्भ्यांमामाप्याययाप्याययदुःखातुरंमामानंदयानंदयशिवकवचेनमांछादयमृत्युंजयेनमस्तेनमस्ते॥ ॥इत्यंतंमहामंत्रंसहस्रवर्णीरत्यंत गुह्यंसहस्रशस्तादृश्याएकादशावृत्तीश्चाजप्त्वा॥ जपसमाप्तौपूर्ववन्मुद्रांप्रदर्श्य पूर्ववच्छिवपंचाक्षरमंत्रशतंजप्त्वा॥ ऋषभउवाच॥ इत्येतत्कवचंशैवंवरदंव्याहृतंमया॥ सर्वबाधाप्रशमनंरहस्यंसर्वदेहिनां॥२०॥ यः सदाधारयेन्मर्त्यःशैवंकवचमुत्तमं॥ नतस्यजायतेक्वापि भयंशंभोरनुग्रहात्॥२१॥ क्षीणायुः प्राप्तमृत्युर्वामहारोगहतोपिवा॥ सद्यःसुखमवाप्नोतिदीर्घमायुश्चविंदति॥ २२॥ सर्वदारिद्र्यशमनंसौभाग्यस्यविवर्धनं॥ योधत्तेक

वचंशैवंसदादेवैर्विष्णूक्तंते॥ २३॥ महापातकसंघातैर्मुच्यतेचोपपातकैः॥ देहांतेमुक्तिमाप्नोतिशिवकर्मानुभावतः॥ २४॥ त्वमपिश्रद्धयावत्स शैवंकवचमुत्तमं॥ धारयस्वमयादत्तंसद्यः श्रेयोह्यवाप्स्यसि॥ २५॥ सूतउवाच॥ इत्युक्त्वाऋषभोयोगीतस्मैपार्थिवसूनवेददौशंखंमहानादंसर्वशत्रुनिषूदनं॥ २६॥ पुनश्चभस्मसंमंत्र्यतदंगंपरितोस्पृशत्॥ गजानांषट्सहस्रस्यद्विगुणस्यबलंददौ॥ २७॥ भस्मप्रभावात्संप्राप्यबलैश्वर्यधृतिस्मृतिः॥ सराजपुत्रःशुशुभेशारदार्कइवश्रिया॥ २८॥ तमाहभांजलिंभूयःसयोगीनृपनंदनं॥ एषखड्गोमयादत्तस्तपोमंत्रानुभावतः॥ २९॥ सिद्धयारमिमंखड्गंयस्मैदर्शयसेस्फुटं॥ससद्योम्रियतेशत्रुःसाक्षान्मृत्युरपिस्वयं॥ ३०॥ अस्यशंखस्यनिर्ह्रादंयेशृण्वंतितवाहिताः॥ तेमूर्छिताःपतिष्यंतिन्यस्तशस्त्राविचेतनाः॥ ३१॥ खड्गशंखावितोदिव्यौपरसैन्यविनाशिनौ॥

नो॥ आत्मसैन्यस्वपक्षाणांत्रयोयेनतेजोविवर्द्धनो॥४७॥ एतयोश्चप्रभावेनत्रैलोक्येनकवचेनच
द्विषद्सहस्रनागानांबलेनमहतापिच॥४७॥ भस्मधारणसामर्थ्याच्छत्रुसैन्यंविजेष्यसि
त्वंपशुसिंहासनंपेत्र्यंगोसासिपृथिवीमिमां॥४९॥ इतिभद्रायुषंसम्यगनुज्ञास्यसमाहितं
ताभ्यांसंपूजितःसोथयोगीस्वेरगतिर्ययौ॥४५॥ इतिफलश्रुतिंसकृत्पठित्वा॥सकृद्विभू
तिमभिमंत्र्य॥ श्रीसांबसदाशिवायजपंनिवेद्य॥ शुक्लातिशुक्लगोक्षीरंगृह्णीयात्मत्कृ
तंजपं॥ सिद्धिर्भवतुमेदेवत्वत्प्रसादान्महेश्वर॥पूर्वोक्तप्रकारेणमानसंविधाय॥
उत्तरषडंगंन्यासं॥तद्यथामानसंभावयेत्॥न्यूनंवाप्यतिरिक्तंवायन्मयामोहतः कृतं॥
सर्वंतदस्तुसंपूर्णंत्वत्प्रसादान्महेश्वर॥१॥त्वत्स्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु॥
न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं॥२॥यदक्षरपदभ्रष्टंमात्राहीनंतुयद्भवेत्॥तत्सर्वं
क्षम्यतांदेवप्रसीदपरमेश्वर॥३॥यत्कृतंजपपूजादिविदितंपरमेश्वर॥मोक्षापवर्गसिध्यर्थं

॥९॥

ग्रहाणपरमेश्वर॥४॥जपपूजादिकंदेवयत्कृतंत्वदनुग्रहात्॥तेन श्रीभगवान्रुद्रःप्रीयतांप
रमेश्वरः॥५॥अपराधसहस्राणिक्रियंतेहर्निशंमया॥दासोयमितिमांमत्वासमस्वपरमेश्वर॥
६॥भूमौस्खलितपादानांभूमिदेवावलंबनं॥त्वयिजातापराधानांत्वमेवशरणंमम॥७॥
नानायोनिसहस्रेषुयेषुयेषुव्रजाम्यहं॥तावत्तंभक्तिभावेनदेहेस्मिन्संनिधीभव॥८॥इति
प्रार्थनासमाप्तः॥ इतिजपविधिः समाप्तः॥ ॥अथकामनापरत्वेनजपसंख्यामाह॥
पुत्रार्थेएकविंशतिदिनमध्येलक्षंजपेत्॥ कन्यार्थेलक्षद्वयं॥धनार्थेदशलक्षं॥रोगनाशना
र्थंपंचलक्षं शिरोरोगादिपंचदिनमध्येलक्षंजपेत्॥ महारोगेतुएकादशदिनमध्येएकादश
लक्षंजपेत्॥शत्रूच्चाटेलक्षंद्वयंद्वेष्यर्थेषट्लक्षंजपेत्॥ आयुर्दृढ्यर्थेदशलक्षं॥ विद्याकामनस्य
लक्षत्रयं॥ अन्यत्रचकाम्यलघुभावेन जपसंख्यासद्दशायुतलक्षदशलक्ष[illegible]ग्रहभू
तग्रहराक्षसवेतालशाकिनीडाकिनीपिशाचादिविविधपीडानिरसनार्थं॥एकविंशतिदिन

मध्येएकादशजपेत्सएकादशसहस्रंजपेत्॥अथवाएकादशदिनपर्यंतंप्रत्यहंअष्टोत्तरशतावृत्याजपेत्॥जपसमाप्तिपर्यंतंयजमानआचार्यैऋत्विक्सहितब्रह्मचर्यंचरेत्॥हविष्यान्नंभुंजीतः॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेसहस्राक्षरशिवकवचपुराणविधिशिवधर्मकथनंनामद्वादशोध्यायः समाप्तः॥एकादश्यादिनान्येवप्रत्यहंनियतःपठेत्।अष्टोत्तरशतावृत्याकुर्यादेकाग्यमानसः।ऋत्विगाचार्यसहितोब्रह्मचर्यव्रतंचरेत्।आसमाप्तिव्रतंयावद्यजमानोहिसर्वदा।हविष्यान्नंहिभुंजीतभूमौशय्यांसधारणांइत्यादिनियमंकृत्वाजपंकुर्याद्विचक्षणः।ततस्तेपूजनंकुर्याद्यथाविभवानुसारतः।एकादशैवयुग्मानिसद्रव्यानिभोजयेत्।ततश्चैश्वरक्षिणांदत्वागच्छेयुरग्निषंततः॥इति।

DR BHAU DAJI LAD MUMBAI MARATHI RESEARCH INSTITUTE MEMORIAL